# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ९४

शृणु राम महाबाहो यदर्थमहमाहतः ।
पितामहेन देवेन प्रेषितोऽस्मि महाबल ॥१॥

तवाहं पूर्वके भावे पुत्रः परपुरञ्जय ।
मायासम्भावितो वीर कालः सर्वसमाहरः ॥२॥

पितामहश्च भगवानाह लोकपतिः प्रभुः ।
समयस्ते महाबाहो स्वर्लोकान्परिरक्षितुम् ॥३॥

सङ्क्षिप्य च पुरा लोकान्मायया स्वयमेव हि ।
महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥४॥

भोगवन्तं ततो नागमनन्तमुदके शयम् ।
मायया जनयित्वा त्वं द्वौ च सत्त्वौ महाबलौ ॥५॥

मधुं च कैटभं चैव ययोरस्थिचयैर्वृता ।
इयं पर्वतसम्बाधा मेदिनी चाभवन्मही ॥६॥

पद्मे दिव्यार्कसङ्काशे नाभ्यामुत्पाद्य माम् अपि ।
प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितम् ॥७॥

सोऽहं संन्यस्तभारो हि त्वामुपासे जगत्पतिम् ।
रक्षां विधत्स्व भूतेषु मम तेजः करो भवान् ॥८॥

ततस्त्वमपि दुर्धर्षस्तस्माद्भावात्सनातनात् ।
रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् ॥९॥

अदित्यां वीर्यवान्पुत्रो भ्रातॄणां हर्षवर्धनः ।
समुत्पन्नेषु कृत्येषु लोकसाह्याय कल्पसे ॥१०॥

स त्वं वित्रास्यमानासु प्रजासु जगतां वर ।
रावणस्य वधाकाङ्क्षी मानुषेषु मनोऽदधाः ॥११॥

दशवर्षसहस्राणि दशवर्षशतानि च ।
कृत्वा वासस्य नियतिं स्वयमेवात्मनः पुरा ॥१२॥

स त्वं मनोमयः पुत्रः पूर्णायुर्मानुषेष्विह ।
कालो नरवरश्रेष्ठ समीपमुपवर्तितुम् ॥१३॥

यदि भूयो महाराज प्रजा इच्छस्युपासितुम् ।
वस वा वीर भद्रं ते एवमाह पितामहः ॥१४॥

अथ वा विजिगीषा ते सुरलोकाय राघव ।
सनाथा विष्णुना देवा भवन्तु विगतज्वराः ॥१५॥

श्रुत्वा पितामहेनोक्तं वाक्यं कालसमीरितम् ।
राघवः प्रहसन्वाक्यं सर्वसंहारमब्रवीत् ॥१६॥

श्रुतं मे देवदेवस्य वाक्यं परममद्भुतम् ।
प्रीतिर्हि महती जाता तवागमनसम्भवा ॥१७॥

भद्रं तेऽस्तु गमिष्यामि यत एवाहमागतः ।
हृद्गतो ह्यसि सम्प्राप्तो न मेऽस्त्यत्र विचारणा ॥१८॥

मया हि सर्वकृत्येषु देवानां वशवर्तिनाम् ।
स्थातव्यं सर्वसंहारे यथा ह्याह पितामहः ॥१९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com